International Journal of Sanskrit Research 2025; 11(2): 102-104

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2025; 11(2): 102-104
© 2025 IJSR
www.anantaajournal.com
Received: 03-02-2025
Accepted: 01-03-2025

**Midhun MS**
Research Scholar, Department of Sanskrit Nyaya, Sree Sankaracharya University of Sanskrit Kalady, Kerala, India

# न्याय–योगशास्त्रयोः ईश्वरविचारः

**Midhun MS**

**सारांश**
मानवीयसंस्कारे ईश्वरस्यस्वाधीनः अवर्णनीयमस्ति। मानवानां संस्कारनिर्माणाय ईश्वरः महत् योगदानं कृतमिति कारणेन ईश्वरविश्वासः आधुनिककालेऽपि वर्तते। एतादृशः ईश्वरः परमात्मा, ॐकारमित्यादि अपरनाम्ना प्रसिद्धः। वेदकालादारभ्य ईश्वरस्वीकारः अकरोत्। कारणं तु वेदेस्मिन् ईश्वरस्य स्थाने इन्द्रादि देवानां प्रतिपादनमेव कुर्वन्ति। मानवेभ्यः क्रियमाणः विविध यागानुष्ठानानां फलेन देवेभ्यः स्वधर्मपरिपालनार्थं शक्तिः प्राप्नोति। तेन मानवजीवनं सुखकरः भविष्यति। देवानां प्रीत्यर्थं क्रियमाणः कर्मणामाविष्कारः चतुर्वेदेषु उत्तमरीत्या प्रतिपादयन्ति।
वैदिककालस्य अन्तिमकाले (भारतीयतत्वचिन्तायाः प्रारम्भकाले) ईश्वरविषये विभिन्नाभिप्रायाणि समागतानि। दर्शनिकाः स्वस्य युक्त्यानुसारं विभिन्नानि अभिप्रायाणि प्रकटितानि। तेषु प्रमुखौ भवतः पतञ्जलेः योगदर्शनम्, गौतमस्य न्यायदर्शनम् च। द्वयोः शास्त्रयोः प्रवर्त्तनशैलिः भिन्नाः चेदपि तेषां लक्ष्यं मोक्षप्राप्तिरेव। शास्त्रद्वयोः ईश्वरस्वीकारः किदृशमिति अवगमनमेव पत्रस्यास्य प्रमुखोद्येश्यः।

**कूट शब्द :** ईश्वरः, योगशास्त्रम्, न्यायशास्त्रम्,

## प्रस्तावना

### योगशास्त्रे ईश्वरविचारः

सेश्वरसांख्यमिति अपरनाम्न विख्यातं दर्शनं भवति योगदर्शनम्। पतञ्जलिना विरचितं योगसूत्रमिति ग्रन्थमेव शास्त्रस्यास्य आधारग्रन्थः। प्रकृतिरेव प्रपञ्चस्य मूलकारणमिति उत्घोषितस्य सांख्यस्य पञ्चविंशति तत्वानां अङ्गीकारः योगमते कृतमिति कारणेन शास्त्रमिदं संख्यादर्शनेन सह सामानता प्रकटयति। किन्तु दर्शनद्वयेषु अस्ति काश्चन अभेदः। सांख्यदर्शने युक्त्यनुसारं ईश्वरास्तित्वं तिरस्करोति। किन्तु योगमते ईश्वरंस्य अङ्गीकारमेव द्रष्टुं शक्नोति। चित्तशुद्ध्यर्थं क्रियमाणः अष्टाङ्गयोगेषु अन्यतमः नियमाङ्गे ईश्वरस्य प्रतिपादनं करोति। ईश्वराङ्गीकारेण एव विदूशकाः शास्त्रमिदं सेश्वरसांख्यमिति नामनिर्देशः कृतः।

सांख्याः निरीश्वरत्वेन स्वमतं स्थापितं चेत्, योगमते मनसः एकाग्रताप्राप्त्यर्थं क्रियमाणः परिशीलनेषु ईश्वरस्य प्राधान्यः प्रतिपादयति। तदर्थं दृष्टिः निश्चितबिन्दुं प्रति केन्द्रिकृत्य एकाग्रतां प्राप्नोति इति तेषामाशयः। अयं दृष्टिः (बिन्दु) एव ईश्वरः योगमतमुत्घोषयन्ति। मनसः एकीकरणाय ईश्वरस्य ध्यानमेव परिशीलनीयमिति सूत्रकारः नोक्तवान्। साधकस्य रुचिभेदानुसारं किमपि वस्तुं स्वीकर्तुं शक्नोतीति सूत्रकारस्य आशयः। सूत्रकारस्याभिप्रायेण ईश्वरः प्रपञ्चस्य सृष्टिकर्ता नास्ति, सांख्यामतस्य प्रपञ्चविषयाः योगमते अङ्गीकुर्वन्ति। रागद्वेषादिमालिन्येभ्यः, धर्माधर्मेभ्यश्च निर्मुक्तः विशेषव्यक्तिरेव ईश्वरः। हरिदासभट्टाचार्यस्य अभिप्रायेण योगमते ईश्वरः अनेकपुरुषेषु एकः एव, प्रपञ्चसृष्ट्यर्थं ईश्वरस्य किमपि योगदानं नावश्यकं, सृष्टिः प्रकृतेः प्रवर्त्तनमेव, योगशास्त्रे ईश्वरः केवलं आदर्शानां मूर्तिमत्भावमेव। योगमते "ईश्वरप्रणिधानद्वा" [1] इति सूत्रेण ईश्वरसाक्षात्कारविषये सूत्रकारः प्रतिपादयति। प्रणिधानमिति पदस्यार्थः भक्तिविशेषः। मनसा–वाचा–कर्मणा क्रियमाणः भक्तिविशेषेण ईश्वरः योगिम् अनुगृणाति। तेन योगिन आसन्नतमः समाधिलाभः, सामाधिफलं च भवतीति[2] । ईश्वरः कः इति आगामि सूत्रे प्रतिपादयति। "क्लेशकर्म विपाकाशयैरपरामृष्टः पुरुषविशेषः ईश्वरः" [3] इति। अविद्यादयः क्लेशाः, तत् नानाविधेन दुःखप्रहरेण परुषं प्रति क्लेशः प्रददाति। कर्माणि कुशलाकुशलानि, कुशलाकुशलानाम् अपररूपमेव धर्माधर्माः। धर्माधर्माः कर्मणा जायतेति कारणेन तदपि कर्माश्रितं भवति। कर्माणां विपाकः जन्मात् आरभ्य आयुष्कालपर्यन्तः जायमानः अनुभवः। जीवनानुभवमपि कर्माणां विपाकाश्रयः एव। वसनाः विपाश्रयाः, तत् मनसि वर्तमानाः पुरुषं व्यपदिश्यति।

---

[1] योगसूत्रम्– समाधिपादः–२३
[2] पातञ्जलयोगसूत्रम– पु.सं–५७
[3] योगसूत्रम्– समाधिपादः –२४

**Corresponding Author:**
**Midhun MS**
Research Scholar, Department of Sanskrit Nyaya, Sree Sankaracharya University of Sanskrit Kalady, Kerala, India

स हि तत्फलस्य भोक्तेति। एतादृशः पुरुषः ईश्वरेण सह सम्बन्धितः चेत् तत्सम्यक् न भविष्यति। यः बुद्धिस्थितः पुरुषमात्रासाधरणप्रस्तुतभोगे अस्पृशति, सः परुषविशेषः ईश्वरः। ईश्वरः सर्वज्ञः इति आगामिसूत्रे प्रतिपाद्यते, यथा– "तत्र निरतिशयं सर्वज्ञभीजम्" [4]।

"पूर्वेषामपि गुरुः कालेनानवच्छेदात्" [5] इति सूत्रेण ईश्वरः शाश्वतः इति स्थापयति। "तस्य वाचकः प्रणवः" [6] इति सूत्रे ईश्वरः शव्दः प्रणवः, प्रणवस्य वाच्यः ईश्वरः च भवति। अननात्रं सधनापादे विद्यमानः सूत्रेण "समाधिसिद्धिरीश्वरप्रणिधानात्" [7] इति सूत्रेण ईश्वरं समर्पितं योगिं समाधिसिद्धिर्जायतेति सूत्रकारः निर्देशयति। तेन योगिः देशान्तरे– कालान्तरे च विराजितः अभीप्तितस्य यथार्थज्ञानं प्राप्तुमवसरः भविष्यति। ईश्वरप्रणिदानेन संप्रज्ञासमाधिः साधयति।

राधाकृष्णन् महोदयस्याभिप्रायेण कैवल्यप्राप्त्यर्थं उपयुज्यमानः कश्चन मार्गमेव ईश्वरभक्तिः। ईश्वरः केवलं पुरुषविशेषः भवति, मानवस्य सृष्टा नास्ति, तस्य संरक्षकः च नास्ति। सः मानवकर्मेषु उचित प्रोत्साहनं, दण्डनं च किमपि न ददाति। योगशास्त्रे ईश्वरप्रतिपादनम् सामान्यजनानाम् आकर्षणाय कृतमिति आचार्यस्याभिप्रायः।

गार्वे इत्यादि आधुनिकपण्डितानाम् अभिप्रायेण योगमते ईश्वराङ्गीकारः अन्यशास्त्राणां प्रीतिसम्पादनार्थमेव कृतं, तेन योगस्य प्रचारः सुखकरः अभवत्। केवलं योगसूत्रस्य प्रथमपादे विद्यामानः त्रयोविंशितिः सूत्रात् आरभ्य सप्तविंशति पर्यन्तसूत्रेषु, द्वितीयपादस्य पञ्चचत्वारिंशत् तमः सूत्रे च योगशास्त्रे ईश्वरवर्णनं करोति। योगमते ईश्वरविषयः नास्ति चेदपि शास्त्राभिवृतेः किमपि हानिः न सम्भवति। अनेन इदं ज्ञायते यत्, योगमतस्य पूर्वकाले शास्त्रेस्मिन् ईश्वरः नासीत्, कालान्तरे योगशास्त्रप्रचाराय, शास्त्राकर्षणाय च शास्त्रे योजितमिति ममाभिप्रायः।

## न्यायमते ईश्वरविचारः

प्रमाणशास्त्रमिति प्रसिद्धं न्यायदर्शनस्य प्रवर्तकः गौतमः भवति। गौतमात् पूर्वमपि न्यायशास्त्रमासीत्, परन्तु गौतमेन कृत न्यायसूत्रमिति ग्रन्थस्य आधारेण एव न्यायशास्त्रस्य व्यवस्थापितरूपमागतम्। अत एव गौतमः न्यायशास्त्रस्य स्थापकत्वेन परिगण्यते। शास्त्रोऽयं प्राचीनन्यायः, नव्यन्यायमिति भेदद्वयं वर्तते। प्राचीनन्यायस्य कालमेव न्यायमतस्य प्रारम्भकालः। दर्शनोऽयं वैशेषिकदर्शनेन सह सम्भावना प्रकटयति।

न्यायसूत्रे बहवः विषयः सूत्रकारः प्रतिपादितवान्। तेषु प्रमुखः भवति ईश्वरविचारः। गौतमः ईश्वरं अङ्गीकरोतीति सूत्रग्रन्थस्य अपग्रथानेन अवगच्छति। ईश्वरविचारः सूत्रग्रन्थस्य चतुर्थाध्यायस्य प्रथमाह्निके विद्यामनः ईश्वरोपादानप्रकारणे कृतमस्ति। भाष्यकरः– वार्त्तिककारः च न्यायवीक्षणेन सह सूत्रकारस्य आशयः परिगणितं भवति। अस्य वादस्योपरि यदा चार्वाक, मीमांसका, बौद्ध जैन, सांख्यादि पूर्वपक्षाणां विप्रतिपत्तयः समागताः तदा न्यायाचार्यः उदयनाचर्यः न्यायकुसुमाञ्जलीग्रन्थेन पूर्वपक्षणां विप्रतिपत्तिनां समाधानं दत्वा न्यायमते ईश्वरास्तित्वं स्थापितवान्।

न्यायमते ईश्वरस्थापनाय बहवः हेतवः प्रतिपाद्यते। तेषु प्रमुखः भवति "यथा घटादि कार्यं कर्तृजन्य तथा क्षित्यङ्कुरादिकमपि इति" हेतुः[8]। क्षितिः(पृथ्वी), अङ्गुरमित्यदयः स्वयमेव जायते इति विश्वासः। परन्तु विना कारणेन कार्यः न जायते, अतः क्षित्यङ्गुरादिनां उत्भवस्यापि कश्चन कर्तुः आवश्यकता निश्चयेन भविष्यति। उदाहरणं घटवत्। घटस्य कर्ता कुलालः भवति, तादृशं क्षित्यङ्गुरादिनां कर्ता ईश्वरः इति न्यायमतमुपस्थापयति।

प्रपञ्चस्य सृष्टिः परमाणुसंयोगेन जातमिति नैयायिकानमभिप्रायः। परमाणुसोयोगस्य कारणमेव ईश्वरः। वस्तूनां स्वभावानुगुणं परमाणुः कीदृशं सोयोगः करणीयः इति निर्णेतुं कश्चन विशिष्टशक्तिः अपेक्षितं भवति। नोचेत् प्रपञ्चे वस्तूनि समानेन दृश्यते। परमाणुनां एतादृशः विशिष्टसंयोगः ईश्वरेच्छया जायतेति न्यायशास्त्रस्य अभिप्रायः।

नित्यजीवने कर्मानुसारमवे सुखदुःखानि सम्भवति। तदपि ईश्वरेच्छया सम्भवति। पूर्वजन्मे आर्जितानि सुखदुःखानि अदृष्टमित्युच्यते। अदृष्टस्य कारणेन आगामि जन्मः भविष्यति इति अन्यमेकं वादमस्ति। अदृष्टानुसारं सुखदुःखादीनां मापनं ईश्वरः करोति, तदनुसारमेव सुखदुःखानि संभवति।

वेदग्रन्थाः विषयसंपुष्टेन अद्वितीयः– महत्तमः च भवन्ति। तत्सर्वं तेषां ग्रन्थकारेभ्यः प्राप्तमिति तर्करहितविषयः। परन्तु वेदस्य निर्माणः सामान्यपुरुषेण कर्तुं न शक्यते, तदर्थं त्रिकालपरिज्ञानिनः कश्चन विशिष्टस्य आवश्यकता वर्तते। अयमेव ईश्वरः इति न्यायमतमुत्घोषयति। वेदग्रन्थेषु ईश्वरप्रतिपादनं कृतं, तदपि ईश्वरस्य अन्यमेकं हेतुर्भवति। एतादृशानां विविधहेतुनां माध्यमेन न्यायमते ईश्वरस्य स्थापनं करोति। न्याये उदयनाचार्यात् परं समागताः आचार्याः ईश्वरविषये स्वीकारमनोभावमेव प्रकटितमिति महत्वपूर्णविषयः।

## उपसंहारः

शास्त्रद्वयोः तेषां विचारानुगुणं ईश्वरस्य प्रतिपादनम् कृतम्। न्याय–योगदर्शनौ ईश्वरविषये विभिन्नाभिप्रायौ प्रकटितौ।

ईश्वराङ्गीकारेण योगदर्शनाय सेश्वरसंख्यमिति अपरनाम प्राप्तम्। योगमते ईश्वरः मोक्षसाधकोपकरिः भवति। कैवल्यप्राप्त्यर्थं योगिनं ईश्वरःउपकरोति । नियमाङ्गस्य परिशीलनावसरे ध्यानेन मनसः एकीकर्तुम् उपयुज्यमानः कश्चन उपाधिरेव ईश्वरः। ईश्वरध्यानेन योगिनः मनसि एकाग्रता प्राप्नोतीति सूत्रकारणाम् अभिप्रायः। योगदर्शने ईश्वरस्य प्रतिपादनं अधिकतया न कृतम्, अतः ईश्वराभावेऽपि योगदर्शनस्य किमपि हानिः न सम्भवति।

तत् स्थाने न्यायमते ईश्वरः प्रपञ्चस्य निमित्तकारणं भवति। परमाणुसंयोगस्य कारणभूतः ईश्वरः इति नैयायिकानां पक्षः। न्यायमतस्य प्ररम्भकाले ईश्वरं प्रति सम्भावना प्रकटितः चेदपि कालान्तरे पूर्वपक्षाणां निरीश्वरवादाः खण्डयित्वा उदयनाचर्यः ईश्वरास्थित्वं प्रमाणेन सह स्थापितवन्तः। तदनन्तरं समागताः नैयायिकाः ईश्वरस्य स्वीकारमेव कृतम्। तेन नव्यन्यायेऽपि ईश्वरस्य अङ्गीकारः वर्तते।

योगमतापेक्षया न्यायमते ईश्वरस्य अधिकप्राधान्यमस्ति। योगशास्त्रे केवलं मोक्षसाधक रूपेण ईश्वरं परिगण्यते चेत् न्यायमते ईश्वरास्तित्वं स्थापयित्वा ईश्वरस्य विविधकर्माणां समग्रप्रतिपादनमपि करोति। केवलं न्यायनये एव प्रमाणेन सह ईश्वरस्थापनं कृतमिति मन्यते। अतः योगदर्शनापेक्षया न्यायमते ईश्वरस्य अधिकप्राधान्यमस्ति।

## संदर्भ सूची


1. उदयनाचार्यः, न्यायकुसुमञ्जलि, चौखम्बा संस्कृतसंस्थानं वारणासि, २०२२.
2. गुणरत्नसुरीकृतव्याख्या, षट्दर्शनसमुच्चयः, तृतीयसंस्करणम्, भारतीयज्ञानपीठप्राकशानम्।
3. डॉ.उदयशंकर झा, संस्कृत शास्त्र–मञ्जूषा, चौखम्बा सुरभारती प्रकाशन वारणासी।
4. माधवाचार्यः, सर्वदर्शनसङ्ग्रहः, प्रथमसंस्करणम्, चौखम्बाविद्याभवनम् ,वारणासी।
5. श्री विश्वनाथपञ्चाननः, न्यायसिद्धान्तमुक्तावलिः, सम्पा–श्रीज्वालाप्रसादगौड़, चौखम्बा
6. संस्कृत सीरीजी आफिस,वाराणासि।
7. श्रीमद् अन्नंभट्टः, तर्कसंग्रहः, चौखम्बा संस्कृत सीरीजी आफिस,वाराणासि।
8. Dr. Retheesh, Dr. S. Sivakumar, *Udayanacharyante Nyayakusumanjali pushpanjaleesahitham*, transilation, Paridhi Publication Thiruvanathaparam. 2016.
9. K.Damodaran, *Bharatiya Chinta*, Frist publication in 1973, state institute of Languages,Kerala.


[4] योगसूत्रम्– समाधिपादः–२५
[5] योगसूत्रम्– समाधिपादः २६
[6] योगसूत्रम्– समाधिपादः २७
[7] योगसूत्रम्– साधनापादः–४५
[8] मुक्तावलिः, ईश्वरानुमानं,१५

10. S. Radhakrishnan, *Indian philosophy*, George Allen & Unwin Ltd New York. Ed1966.
11. Vidwan kilimanoor S. Ragava Warrier, Paatabjala yogasuutram, Soori Books Thiruvananthapuram,1997.